श्री बटुकभैरव कवचं

श्री बटुकभैरव कवचं

श्रीभैरव उवाच |
देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवं |
म्रियंते साधका येन विना श्मशानभूमिषु | |
रणेषु चातिघोरेषु महावायुजलेषु च |
शृंगिमकरवज्रेषु ज्वरादिव्याधिवह्निषु | |

श्रीदेव्युवाच |
कथयामि शृणु प्राज्ञ बटोस्तु कवचं शुभं |
गोपनीयं प्रयत्नेन मातृजारोपमं यथा | |
तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः |
सात्त्विकं राजसं चैव तामसं देव तत् शृणु | |

ध्यानं –
वंदे बालं स्फटिकसदृशं कुंडलोद्भासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः |
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां बटुकमनिशं शूलखड्गौदधानं | | 1 | |

उद्यद्भास्करसन्निभं त्रिनयनं रक्तांगरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः |
नीलग्रीवमुदारभूषणशतं शीतांशुचूडोज्ज्वलं
बंधूकारुणवाससं भयहरं देवं सदा भावये | | 2 | |

ध्यायेन्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं
दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गशूलाभयानि |
नागं घंटां कपालं करसरसिरुहैर्विभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणी नूपुराढ्यं | | 3 | |

अस्य वटुकभैरवकवचस्य महाकाल ऋषिरनुष्टुप्छंदः श्रीवटुकभैरवो देवता बं बीजं ह्रीं शक्तिरापदुद्धारणायेति कीलकं मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः |

कवचं –

ॐ शिरो मे भैरवः पातु ललाटं भीषणस्तथा |
नेत्रे च भूतहननः सारमेयानुगो भ्रुवौ || 1

भूतनाथश्च मे कर्णौ कपोलौ प्रेतवाहनः |
नासापुटौ तथोष्ठौ च भस्मांगः सर्वभूषणः || 2

भीषणास्यो ममास्यं च शक्तिहस्तो गलं मम |
स्कंधौ दैत्यरिपुः पातु बाहू अतुलविक्रमः || 3

पाणी कपाली मे पातु मुंडमालाधरो हृदं |
वक्षःस्थलं तथा शांतः कामचारी स्तनं मम || 4

उदरं च स मे तुष्टः क्षेत्रेशः पार्श्वतस्तथा |
क्षेत्रपालः पृष्ठदेशं क्षेत्राख्यो नाभितस्तथा || 5

कटिं पापौघनाशश्च बटुको लिंगदेशकं |
गुदं रक्षाकरः पातु ऊरू रक्षाकरः सदा || 6

जानू च घुर्घुरारावो जंघे रक्षतु रक्तपः |
गुल्फौ च पादुकासिद्धः पादपृष्ठं सुरेश्वरः || 7

आपादमस्तकं चैव आपदुद्धारणस्तथा |
सहस्रारे महापद्मे कर्पूरधवलो गुरुः || 8

पातु मां वटुको देवो भैरवः सर्वकर्मसु |
पूर्व स्यामसितांगो मे दिशि रक्षतु सर्वदा || 9

आग्नेय्यां च रुरुः पातु दक्षिणे चंडभैरवः |
नैर्ऋत्यां क्रोधनः पातु मामुन्मत्तस्तु पश्चिमे || 10

वायव्यां मे कपाली च नित्यं पायात् सुरेश्वरः |
भीषणो भैरवः पातूत्तरस्यां दिशि सर्वदा || 11

संहारभैरवः पातु दिश्यैशान्यां महेश्वरः |
ऊर्ध्वे पातु विधाता वै पाताले नंदिको विभुः || 12

सद्योजातस्तु मां पायात् सर्वतो देवसेवितः |
वामदेवोऽवतु प्रीतो रणे घोरे तथावतु || 13

जले तत्पुरुषः पातु स्थले पातु गुरुः सदा |
डाकिनीपुत्रकः पातु दारांस्तु लाकिनीसुतः || 14

पातु साकलको भ्रातॄन् श्रियं मे सततं गिरः |
लाकिनीपुत्रकः पातु पशूनश्वानजांस्तथा || 15

महाकालोऽवतु च्छत्रं सैन्यं वै कालभैरवः |
राज्यं राज्यश्रियं पायात् भैरवो भीतिहारकः || 16

रक्षाहीनंतु यत् स्थानं वर्जितं कवचेन च |
तत् सर्वं रक्ष मे देव त्वं यतः सर्वरक्षकः || 17

एतत् कवचमीशान तव स्नेहात् प्रकाशितं |
नाख्येयं नरलोकेषु सारभूतं च सुश्रियं || 18

यस्मै कस्मै न दातव्यं कवचेशं सुदुर्लभं |
न देयं परशिष्येभ्यः कृपणेभ्यश्च शंकर || 19

यो ददाति निषिद्धेभ्यः स वै भ्रष्टो भवेद्ध्रुवं |
अनेन कवचेशेन रक्षां कृत्वा द्विजोत्तमः || 20

विचरन् यत्र कुत्रापि विघ्नौघैः प्राप्यते न सः |
मंत्रेण म्रियते योगी कवचं यन्न रक्षितः || 21

तस्मात् सर्वप्रयत्नेन दुर्लभं पापचेतसां |
भूर्जे रंभात्वचे वापि लिखित्वा विधिवत् प्रभो || 22

धारयेत् पाठयेद्वापि संपठेद्वापि नित्यशः |
संप्राप्नोति प्रभावं वै कवचस्यास्य वर्णितं || 23

नमो भैरवदेवाय सारभूताय वै नमः |
नमस्त्रैलोक्यनाथाय नाथनाथाय वै नमः || 24

इति विश्वसारोद्धारतंत्रे आपदुद्धारकल्पे भैरवभैरवीसंवादे वटुकभैरवकवचं समाप्तं ||